shivakach

# શિવકવચં અમોઘશિવકવચં ચ

## Document Information

Text title : shivakavacham also known as amoghashivakavacham

File name : amoghashivakavach.itx

Category : kavacha, shiva

Location : doc_shiva

Transliterated by : Surin Usgaonkar usgaonkar at hotmail.com

Proofread by : various, final NA

Description-comments : shrIskaande mahaapuraaNe ekaashItisaahasrayaa.n tRitIye brahmottarakhaNDe

Latest update : October 14, 2005, June 19, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શિવકવચં અમોઘશિવકવચં ચ

શ્રીસામ્બાસદાશિવકવચસ્તોત્રમ્
શ્રીગણેશાય નમઃ ।

॥ અથ શિવકવચમ્ ॥

વિનિયોગઃ ।
અસ્ય શ્રીશિવકવચસ્તોત્રમન્ત્રસ્ય,
બ્રહ્મા ઋષિઃ, var વૃષભ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીસદાશિવરુદ્રો દેવતા, હ્રીં શક્તિઃ,
વં કીલકમ્, શ્રીં હ્રીં ક્લીં બીજમ્,
શ્રીસદાશિવપ્રીત્યર્થે શિવકવચસ્તોત્રજપે વિનિયોગઃ ॥

॥ ઋષ્યાદિન્યાસઃ ॥

ૐ બ્રહ્મઋષયે નમઃ શિરસિ । અનુષ્ટુપ્ છન્દસે નમઃ, મુખે ।
શ્રીસદાશિવરુદ્રદેવતાય નમઃ હૃદિ । હ્રીં શક્તયે નમઃ, પાદયોઃ ।
વં કીલકાય નમઃ નાભૌ । શ્રી હ્રીં ક્લીમિતિ બીજાય નમઃ ગુહ્યે ।
વિનિયોગાય નમઃ, સર્વાઙ્ગે ॥

॥ અથ કરન્યાસઃ ॥ see another version at the end
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ હ્રીં રાં સર્વશક્તિધામ્ને ઈશાનાત્મને અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ નં રીં નિત્યતૃપ્તિધામ્ને તત્પુરુષાત્મને તર્જનીભ્યાં નમઃ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ મં રું અનાદિશક્તિધામ્ને અઘોરાત્મને મધ્યમાભ્યાં નમઃ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ શિં રૈં સ્વતન્ત્રશક્તિધામ્ને વામદેવાત્મને અનામિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને

ૐ વાં રૌં અલુપ્તશક્તિધામ્ને સદ્યોજાતાત્મને કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ યં રઃ અનાદિશક્તિધામ્ને સર્વાત્મને કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ હૃદયાદ્યઙ્ગન્યાસઃ ॥ see another version at the end
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ હ્રીં રાં સર્વશક્તિધામ્ને ઈશાનાત્મને હૃદયાય નમઃ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ નં રીં નિત્યતૃપ્તિધામ્ને તત્પુરુષાત્મને શિરસે સ્વાહા ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ મં રું અનાદિશક્તિધામ્ને અઘોરાત્મને શિખાયૈ વષટ્ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ શિં રૈં સ્વતન્ત્રશક્તિધામ્ને વામદેવાત્મને કવચાય હુમ્ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ વાં રૌં અલુપ્તશક્તિધામ્ને સદ્યોજાતાત્મને નેત્રત્રયાય વૌષટ્ ।
ૐ નમો ભગવતે જ્વલજ્જ્વાલામાલિને
ૐ યં રઃ અનાદિશક્તિધામ્ને સર્વાત્મને અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્
વજ્રદંષ્ટ્રં ત્રિનયનં કાલકણ્ઠમરિન્દમમ્ ।
સહસ્રકરમપ્યુગ્રં વન્દે શમ્ભુમુમાપતિમ્ ॥

રુદ્રાક્ષકઙ્કણલસત્કરદણ્ડયુગ્મઃ
  પાલાન્તરાલસિતભસ્મધૃતત્રિપુણ્ડ્રઃ ।
પઞ્ચાક્ષરં પરિપઠન્ વરમન્ત્રરાજં
  ધ્યાયન્ સદા પશુપતિં શરણં વ્રજેથાઃ ॥

અતઃ પરં સર્વપુરાણગુહ્યં
  નિઃશેષપાપૌઘહરં પવિત્રમ્ ।
જયપ્રદં સર્વવિપત્પ્રમોચનં
  વક્ષ્યામિ શૈવં કવચં હિતાય તે ॥

॥ અથ કવચમ્ ॥

ઋષભ ઉવાચ ।
નમસ્કૃત્ય મહાદેવં વિશ્વવ્યાપિનમીશ્વરમ્ ।

વક્ષ્યે શિવમયં વર્મ સર્વરક્ષાકરં નૃણામ્ ॥ ૧॥

શુચૌ દેશે સમાસીનો યથાવત્કલ્પિતાસનઃ ।
જિતેન્દ્રિયો જિતપ્રાણશ્ચિન્તયેચ્છિવમવ્યયમ્ ॥ ૨॥

હૃત્પુણ્ડરીકાન્તરસંનિવિષ્ટં સ્વતેજસા વ્યાપ્તનભોઽવકાશમ્ ।
અતીન્દ્રિયં સૂક્ષ્મમનન્તમાદ્યં ધ્યાયેત્પરાનન્દમયં મહેશમ્ ॥ ૩॥

ધ્યાનાવધૂતાખિલકર્મબન્ધશ્ચિરં ચિદાન્દનિમગ્નચેતાઃ ।
ષડક્ષરન્યાસસમાહિતાત્મા શૈવેન કુર્યાત્કવચેન રક્ષામ્ ॥ ૪॥

માં પાતુ દેવોઽખિલદેવતાત્મા સંસારકૂપે પતિતં ગભીરે ।
તન્નામ દિવ્યં વરમન્ત્રમૂલં ધુનોતુ મે સર્વમઘં હૃદિસ્થમ્ ॥ ૫॥

સર્વત્ર માં રક્ષતુ વિશ્વમૂર્તિર્જ્યોતિર્મયાનન્દઘનશ્ચિદાત્મા ।
અણોરણીયાનુરુશક્તિરેકઃ સ ઈશ્વરઃ પાતુ ભયાદશેષાત્ ॥ ૬॥

યો ભૂસ્વરૂપેણ બિભર્તિ વિશ્વં પાયાત્સ ભૂમેર્ગિરિશોઽષ્ટમૂર્તિઃ ।
યોઽપાં સ્વરૂપેણ નૃણાં કરોતિ સઞ્જીવનં સોઽવતુ માં જલેભ્યઃ ॥ ૭॥

કલ્પાવસાને ભુવનાનિ દગ્ધ્વા સર્વાણિ યો નૃત્યતિ ભૂરિલીલઃ ।
સ કાલરુદ્રોઽવતુ માં દવાગ્નેર્વાત્યાદિભીતેરખિલાચ્ચ તાપાત્ ॥ ૮॥

પ્રદીપ્તવિદ્યુત્કનકાવભાસો વિદ્યાવરાભીતિકુઠારપાણિઃ ।
ચતુર્મુખસ્તત્પુરુષસ્ત્રિનેત્રઃ પ્રાચ્યાં સ્થિતં રક્ષતુ મામજસ્ત્રમ્ ॥ ૯॥

કુઠારવેદાઙ્કુશપાશશૂલકપાલઢક્કાક્ષગુણાન્દધાનઃ ।
ચતુર્મુખો નીલરુચિસ્ત્રિનેત્રઃ પાયાદઘોરો દિશિ દક્ષિણસ્યામ્ ॥ ૧૦॥

કુન્દેન્દુશઙ્ખસ્ફટિકાવભાસો વેદાક્ષમાલાવરદાભયાઙ્કઃ ।
ત્ર્યક્ષશ્ચતુર્વક્ત્ર ઉરુપ્રભાવઃ સદ્યોઽધિજાતોઽવતુ માં પ્રતીચ્યામ્ ॥ ૧૧॥

વરાક્ષમાલાભયટઙ્કહસ્તઃ સરોજકિઞ્જલ્કસમાનવર્ણઃ ।
ત્રિલોચનશ્ચારુચતુર્મુખો માં પાયાદુદિચ્યાં દિશિ વામદેવઃ ॥ ૧૨॥

વેદાભયેષ્ટાઙ્કુશટઙ્કપાશકપાલઢક્કાક્ષશૂલપાણિઃ । પાશટઙ્ક
સિતદ્યુતિઃ પઞ્ચમુખોઽવતાન્મામીશાન ઊર્ધ્વં પરમપ્રકાશઃ ॥ ૧૩॥

મૂર્ધાનમવ્યાન્મમ ચન્દ્રમૌલિર્ભાલં મમાવ્યાદથ ભાલનેત્રઃ ।
નેત્રે મમાવ્યાદ્ભગનેત્રહારી નાસાં સદા રક્ષતુ વિશ્વનાથઃ ॥ ૧૪॥

પાયાચ્છ્રુતી મે શ્રુતિગીતકીર્તિઃ કપોલમવ્યાત્સતતં કપાલી ।
વક્ત્રં સદા રક્ષતુ પઞ્ચવક્ત્રો જિહ્વાં સદા રક્ષતુ વેદજિહ્વઃ ॥ ૧૫॥

કણ્ઠં ગિરીશોઽવતુ નીલકણ્ઠઃ પાણિદ્વયં પાતુ પિનાકપાણિઃ ।
દોર્મૂલમવ્યાન્મમ ધર્મબાહુર્વક્ષઃસ્થલં દક્ષમખાન્તકોઽવ્યાત્ ॥ ૧૬॥

મમોદરં પાતુ ગિરીન્દ્રધન્વા મધ્યં મમાવ્યાન્મદનાન્તકારી ।
હેરમ્બતાતો મમ પાતુ નાભિં પાયાત્કટી ધૂર્જટિરીશ્વરો મે ॥ ૧૭॥

ઊરુદ્વયં પાતુ કુબેરમિત્રો જાનુદ્વયં મે જગદીશ્વરોઽવ્યાત્ ।
જઙ્ઘાયુગં પુઙ્ગવકેતુરવ્યાત્પાદૌ મમાવ્યાત્સુરવન્દ્યપાદઃ ॥ ૧૮॥

મહેશ્વરઃ પાતુ દિનાદિયામે માં મધ્યયામેઽવતુ વામદેવઃ ।
ત્રિયમ્બકઃ પાતુ તૃતીયયામે વૃષધ્વજઃ પાતુ દિનાન્ત્યયામે ॥ ૧૯॥

પાયાન્નિશાદૌ શશિશેખરો માં ગઙ્ગાધરો રક્ષતુ માં નિશીથે ।
ગૌરીપતિઃ પાતુ નિશાવસાને મૃત્યુઞ્જયો રક્ષતુ સર્વકાલમ્ ॥ ૨૦॥

અન્તઃસ્થિતં રક્ષતુ શઙ્કરો માં સ્થાણુઃ સદા પાતુ બહિઃસ્થિતં મામ્ ।
તદન્તરે પાતુ પતિઃ પશૂનાં સદાશિવો રક્ષતુ માં સમન્તાત્ ॥ ૨૧॥

તિષ્ઠન્તમવ્યાદ્ભુવનૈકનાથઃ પાયાદ્વ્રજન્તં પ્રમથાધિનાથઃ ।
વેદાન્તવેદ્યોઽવતુ માન્નિષણ્ણં મામવ્યયઃ પાતુ શિવઃ શયાનમ્ ॥ ૨૨॥

માર્ગેષુ માં રક્ષતુ નીલકણ્ઠઃ શૈલાદિદુર્ગેષુ પુરત્રયારિઃ ।
અરણ્યવાસાદિમહાપ્રવાસે પાયાન્મૃગવ્યાધ ઉદારશક્તિઃ ॥ ૨૩॥

કલ્પાન્તકાટોપપટુપ્રકોપઃ સ્ફુટાટ્ટહાસોચ્ચલિતાણ્ડકોશઃ ।
ઘોરારિસેનાર્ણવદુર્નિવારમહાભયાદ્રક્ષતુ વીરભદ્રઃ ॥ ૨૪॥

પત્ત્યશ્વમાતઙ્ગઘટાવરૂથસહસ્રલક્ષાયુતકોટિભીષણમ્ ।
અક્ષૌહિણીનાં શતમાતતાયિનાં છિન્દ્યાન્મૃડો ઘોરકુઠારધારયા ॥ ૨૫॥

નિહન્તુ દસ્યૂન્પ્રલયાનલાર્ચિર્જ્વલત્ત્રિશૂલં ત્રિપુરાન્તકસ્ય ।
શાર્દૂલસિંહર્ક્ષવૃકાદિહિંસ્રાન્સન્ત્રાસયત્વીશધનુઃ પિનાકમ્ ॥ ૨૬॥

દુઃસ્વપ્નદુઃશકુનદુર્ગતિદૌર્મનસ્યદુર્ભિક્ષદુર્વ્યસ નદુઃસહદુર્યશાંસિ ।
ઉત્પાતતાપવિષભીતિમસદ્ગ્રહાર્તિવ્યાધીંશ્ચ નાશયતુ મે જગતામધીશઃ ॥ ૨૭॥

ૐ નમો ભગવતે સદાશિવાય સકલતત્ત્વાત્મકાય
સકલતત્ત્વવિહારાય સકલલોકૈકકર્ત્રે સકલલોકૈકભર્ત્રે

સકલલોકૈકહર્ત્રે સકલલોકૈકગુરવે સકલલોકૈકસાક્ષિણે
સકલનિગમગુહ્યાય સકલવરપ્રદાય સકલદુરિતાર્તિભઞ્જનાય
સકલજગદભયઙ્કરાય સકલલોકૈકશઙ્કરાય શશાઙ્કશેખરાય
શાશ્વતનિજાભાસાય નિર્ગુણાય નિરુપમાય નીરૂપાય નિરાભાસાય
નિરામમાય નિષ્પ્રપઞ્ચાય નિષ્કલઙ્કાય નિર્દ્વન્દ્વાય નિઃસઙ્ગાય
નિર્મલાય નિર્ગમાય નિત્યરૂપવિભવાય નિરુપમવિભવાય નિરાધારાય
નિત્યશુદ્ધબુદ્ધપરિપૂર્ણસચ્ચિદાનન્દાદ્વયાય પરમશાન્તપ્રકાશતેજોરૂપાય
જયજય મહારુદ્ર મહારૌદ્ર ભદ્રાવતાર દુઃખદાવદારણ
મહાભૈરવ કાલભૈરવ કલ્પાન્તભૈરવ કપાલમાલાધર
ખટ્વાઙ્ગખડ્ગચર્મપાશાઙ્કુશડમરુશૂલચાપબાણગદાશક્તિભિણ્ડિપાલ-
var ભિન્દિ
તોમરમુસલમુદ્ગરપટ્ટિશપરશુપરિઘભુશુણ્ડીશતઘ્નીચક્રાદ્યાયુધ-
ભીષણકરસહસ્ર મુખદંષ્ટ્રાકરાલ
વિકટાટ્ટહાસવિસ્ફારિતબ્રહ્માણ્ડમણ્ડલ નાગેન્દ્રકુણ્ડલ નાગેન્દ્રહાર
નાગેન્દ્રવલય નાગેન્દ્રચર્મધર મૃત્યુઞ્જય ત્ર્યમ્બક
ત્રિપુરાન્તક વિરૂપાક્ષ વિશ્વેશ્વર વિશ્વરૂપ વૃષભવાહન
વિષભૂષણ વિશ્વતોમુખ સર્વતો રક્ષ રક્ષ માં જ્વલજ્વલ
મહામૃત્યુભયમપમૃત્યુભયં નાશયનાશય
રોગભયમુત્સાદયોત્સાદય વિષસર્પભયં
શમયશમય ચોરભયં મારયમારય મમ શત્રૂનુચ્ચાટયોચ્ચાટય
શૂલેન વિદારય વિદારય કુઠારેણ ભિન્ધિભિન્ધિ
ખડ્ગેન છિન્ધિછિન્ધિ ખટ્વાઙ્ગેન વિપોથય વિપોથય
મુસલેન નિષ્પેષયનિષ્પેષય બાણૈઃ સન્તાડય
સન્તાડય રક્ષાંસિ ભીષયભીષય ભૂતાનિ વિદ્રાવયવિદ્રાવય
કૂષ્માણ્ડવેતાલમારીગણબ્રહ્મરાક્ષસાન્સન્ત્રાસયસન્ત્રાસય મામભયં
કુરુકુરુ વિત્રસ્તં મામાશ્વાસયાશ્વાસય નરકભયાન્મામુદ્ધારયોદ્ધારય
સઞ્જીવયસઞ્જીવય ક્ષુત્તૃડ્ભ્યાં મામાપ્યાયયાપ્યાયય દુઃખાતુરં
મામાનન્દયાનન્દય શિવકવચેન મામાચ્છાદયાચ્છાદય
ત્ર્યમ્બક સદાશિવ નમસ્તે નમસ્તે નમસ્તે ।

પૂર્વવત્ હૃદયાદિ ન્યાસઃ । પઞ્ચપૂજા ॥

ભૂર્ભુવસ્સુવરોમિતિ દિગ્વિમિકઃ ॥

ફલશ્રુતિઃ ।

ઋષભ ઉવાચ ।

ઇત્યેતત્કવચં શૈવં વરદં વ્યાહૃતં મયા ।
સર્વબાધાપ્રશમનં રહસ્યં સર્વદેહિનામ્ ॥ ૨૮॥

યઃ સદા ધારયેન્મર્ત્યઃ શૈવં કવચમુત્તમમ્ ।
ન તસ્ય જાયતે ક્વાપિ ભયં શમ્ભોરનુગ્રહાત્ ॥ ૨૯॥

ક્ષીણાયુર્મૃત્યુમાપન્નો મહારોગહતોઽપિ વા ।
સદ્યઃ સુખમવાપ્નોતિ દીર્ઘમાયુશ્ચ વિન્દતિ ॥ ૩૦॥

સર્વદારિદ્ર્યશમનં સૌમઙ્ગલ્યવિવર્ધનમ્ ।
યો ધત્તે કવચં શૈવં સ દેવૈરપિ પૂજ્યતે ॥ ૩૧॥

મહાપાતકસઙ્ઘાતૈર્મુચ્યતે ચોપપાતકૈઃ ।
દેહાન્તે શિવમાપ્નોતિ શિવવર્માનુભાવતઃ ॥ ૩૨॥

ત્વમપિ શ્રદ્ધયા વત્સ શૈવં કવચમુત્તમમ્ ।
ધારયસ્વ મયા દત્તં સદ્યઃ શ્રેયો હ્યવાપ્સ્યસિ ॥ ૩૩॥

સૂત ઉવાચ ।

ઇત્યુક્ત્વા ઋષભો યોગી તસ્મૈ પાર્થિવસૂનવે ।
દદૌ શઙ્ખં મહારાવં ખડ્ગં ચારિનિષૂદનમ્ ॥ ૩૪॥

પુનશ્ચ ભસ્મ સંમન્ત્ર્ય તદઙ્ગં સર્વતોઽસ્પૃશત્ ।
ગજાનાં ષટ્સહસ્રસ્ય દ્વિગુણં ચ બલં દદૌ ॥ ૮॥

ભસ્મપ્રભાવાત્સમ્પ્રાપ્ય બલૈશ્વર્યધૃતિસ્મૃતીઃ ।
સ રાજપુત્રઃ શુશુભે શરદર્ક ઇવ શ્રિયા ॥ ૯॥

તમાહ પ્રાઞ્જલિં ભૂયઃ સ યોગી રાજનન્દનમ્ ।
એષ ખડ્ગો મયા દત્તસ્તપોમન્ત્રાનુભાવતઃ ॥ ૧૦॥

શિતધારમિમં ખડ્ગં યસ્મૈ દર્શયસિ સ્ફુટમ્ ।
સ સદ્યો મ્રિયતે શત્રુઃ સાક્ષાન્મૃત્યુરપિ સ્વયમ્ ॥ ૧૧॥

અસ્ય શઙ્ખસ્ય નિર્હ્રાદં યે શ‍ૃણ્વન્તિ તવાહિતાઃ ।
તે મૂર્ચ્છિતાઃ પતિષ્યન્તિ ન્યસ્તશસ્ત્રા વિચેતનાઃ ॥ ૧૨॥

ખડ્ગશઙ્ખાવિમૌ દિવ્યૌ પરસૈન્યવિનાશિનૌ ।

આત્મસૈન્યસ્વપક્ષાણાં શૌર્યતેજોવિવર્ધનૌ ॥ ૧૩॥

એતયોશ્ચ પ્રભાવેન શૈવેન કવચેન ચ ।
દ્વિષટ્સહસ્રનાગાનાં બલેન મહતાપિ ચ ॥ ૧૪॥

ભસ્મધારણસામર્થ્યાચ્છત્રુસૈન્યં વિજેષ્યસિ ।
પ્રાપ્ય સિંહાસનં પૈત્ર્યં ગોપ્તાઽસિ પૃથિવીમિમામ્ ॥ ૪૨॥

ઇતિ ભદ્રાયુષં સમ્યગનુશાસ્ય સમાતૃકમ્ ।
તાભ્યાં સમ્પૂજિતઃ સોઽથ યોગી સ્વૈરગતિર્યયૌ ॥ ૪૩॥

ઇતિ શ્રીસ્કાન્દે મહાપુરાણે એકાશીતિસાહસ્ર્યાં સંહિતાયાં તૃતીયે
બ્રહ્મોત્તરખણ્ડે સીમન્તિનીમાહાત્મ્યે ભદ્રાયૂપાખ્યાને
શિવકવચકથનં નામ દ્વાદશોઽધ્યાયઃ ।

There are variations in the initial preparatory verses.
Another version of nyAsa is given below.
The devotee is requested to choose according to one's preference.

કરન્યાસઃ

ઓં સદાશિવાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
નં ગઙ્ગાધરાય તર્જનીભ્યાં નમઃ ।
મં મૃત્યુઞ્જયાય મધ્યમાભ્યાં નમઃ ।
શિં શૂલપાણયે અનામિકાભ્યાં નમઃ ।
વાં પિનાકપાણયે કનિષ્ઠિકાભ્યાં નમઃ ।
યં ઉમાપતયે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

હૃદયાદિ અઙ્ગન્યાસઃ

ઓં સદાશિવાય હૃદયાય નમઃ ।
નં ગઙ્ગાધરાય શિરસે સ્વાહા ।
મં મૃત્યુઞ્જયાય શિખાયૈ વષટ્ ।
શિં શૂલપાણયે કવચાય હુમ્ ।
વાં પિનાકપાણયે નેત્રત્રયાય વૌષટ્ ।
યં ઉમાપતયે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

પઞ્ચપૂજા

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પૈઃ પૂજયામિ ।
યં વાય્વાત્મને ધૂપમ્ આઘ્રાપયામિ ।
રં અગ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારપૂજાં સમર્પયામિ ॥

Encoded and proofread by
Surin Usgaonkar usgaonkar at hotmail.com
Subramanian Ganesh, Sowmya Ramkumar, Avinash Sathaye
NA (from Skandapurana p.196-197)

*shivakach*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*